Puranetihas

Puranetihas

Question Booklet No.

# 13P/269/6

*(To be filled up by the candidate by blue/black ball-point pen)*

Roll No. | | | | | | | | | |

Roll No. (Write the digits in words) ................................................................................

Serial No. of Answer Sheet ..............................................

Day and Date ................................................................ ( Signature of Invigilator )

SEAL

## INSTRUCTIONS TO CANDIDATES

(Use only ***blue/black ball-point pen*** in the space above and on both sides of the **Answer Sheet**)

1. Within 10 minutes of the issue of the Question Booklet, check the Question Booklet to ensure that it contains all the pages in correct sequence and that no page/question is missing. In case of faulty Question Booklet bring it to the notice of the Superintendent/Invigilators immediately to obtain a fresh Question Booklet.
2. Do not bring any loose paper, written or blank, inside the Examination Hall *except the Admit Card without its envelope.*
3. ***A separate Answer Sheet is given. It should not be folded or mutilated. A second Answer Sheet shall not be provided. Only the Answer Sheet will be evaluated.***
4. Write your Roll Number and Serial Number of the Answer Sheet by pen in the space prvided above.
5. ***On the front page of the Answer Sheet, write by pen your Roll Number in the space provided at the top and by darkening the circles at the bottom. Also, wherever applicable, write the Question Booklet Number and the Set Number in appropriate places.***
6. ***No overwriting is allowed in the entries of Roll No., Question Booklet no. and Set no. (if any) on OMR sheet and Roll No. and OMR sheet no. on the Queston Booklet.***
7. ***Any change in the aforesaid entries is to be verified by the invigilator, otherwise it will be taken as unfairmeans.***
8. ***Each question in this Booklet is followed by four alternative answers. For each question, you are to record the correct option on the Answer Sheet by darkening the appropriate circle in the corresponding row of the Answer Sheet, by pen as mentioned in the guidelines given on the first page of the Answer Sheet.***
9. For each question, darken only one circle on the Answer Sheet. If you darken more than one circle or darken a circle partially, the answer will be treated as incorrect.
10. *Note that the answer once filled in ink cannot be changed. If you do not wish to attempt a question, leave all the circles in the corresponding row blank (such question will be awarded zero marks).*
11. For rough work, use the inner back page of the title cover and the blank page at the end of this Booklet.
12. Deposit only **OMR *Answer Sheet*** at the end of the Test.
13. You are not permitted to leave the Examination Hall until the end of the Test.
14. If a candidate attempts to use any form of unfair means, he/she shall be liable to such punishment as the University may determine and impose on him/her.

**Total No. of Printed Pages : 24** *[उपर्युक्त निर्देश हिन्दी में अन्तिम आवरण पृष्ठ पर दिये गए हैं।]*

# 13P/269/6

**No. of Questions : 150**

**प्रश्नों की संख्या : 150**

***Time : 2 Hours*** | ***Full Marks : 450***

***समय : 2 घण्टे*** | ***पूर्णाङ्क : 450***

**Note :** (1) Attempt as many questions as you can. Each question carries **3 (Three)** marks. ***One mark will be deducted for each incorrect answer.*** **Zero** mark will be awarded for each unattempted question.

अधिकाधिक प्रश्नों को हल करने का प्रयत्न करें। प्रत्येक प्रश्न **3 ( तीन )** अंकों का है। ***प्रत्येक गलत उत्तर के लिए एक अंक काटा जायेगा।*** प्रत्येक अनुत्तरित प्रश्न का प्राप्तांक ***शून्य*** होगा।

(2) If more than one alternative answers seem to be approximate to the correct answer, choose the closest one.

यदि एकाधिक वैकल्पिक उत्तर सही उत्तर के निकट प्रतीत हों, तो निकटतम सही उत्तर दें।

**01.** श्रीमद्भागवतं किमस्ति?

(1) महापुराणम्  (2) इतिहासोत्तमम्  (3) आदिकाव्यम्  (4) ज्योतिषशास्त्रम्

**02.** श्रीमद्भागवतस्य कर्त्ता क:।

(1) वाल्मीकि:  (2) पराशर:  (2) व्यास:  (4) शुक:

**03.** कस्मिन् क्षेत्रे शौनकादय ऋषय: सहस्रसमं सत्रमाचेरु:?

(1) ऋषिकेशे  (2) शम्याप्रासे  (3) नैमिषे  (4) कुरुक्षेत्रे

**04.** जनाः कस्मिन्युगे प्रायशोऽल्पायुषो भवन्ति?

(1) सत्ययुगे (2) त्रेतायाम् (3) द्वापरे (4) कलियुगे

**05.** कस्मिन्प्रयोजितः भक्तियोगो वैराग्यं ज्ञानञ्च जनयति?

(1) ज्ञानयोगे (2) कर्मकाण्डे (3) भगवति वासुदेवे (4) देवेन्द्रे

**06.** रथाङ्गपाणिरिति कस्य विशेषणम्?

(1) इन्द्रस्य (2) वरुणस्य (3) श्रीकृष्णस्य (4) अर्जुनस्य

**07.** गृहमेधिनां गृहे को गोदोहनमात्रं तिष्ठति?

(1) श्रीशुकः (2) व्यासः (3) देवर्षिर्नारदः (4) दत्तात्रेयः

**08.** 'वासवीसुत' इति कस्याभिधानम् ?

(1) देवर्षिनारदस्य (2) व्यासस्य (3) शुकस्य (4) जातूकर्णस्य

**09.** सात्वतसंहिता का?

(1) आदिपुराणसंहिता (2) गर्गसंहिता (3) कथाकौमुदी (4) श्रीमद्भागवतम्

**10.** 'अहो मे पश्यताज्ञानं हृदिरुढं दुरात्मन' इति कस्यानुताप-वाक्यम्?

(1) अर्जुनस्य (2) युधिष्ठिरस्य (3) भीमस्य (4) भीष्मस्य

**11.** 'विष्णुरात' इति कस्य नाम?

(1) विष्णुपार्षदस्य (2) प्रह्लादस्य (3) शुकस्य (4) राज्ञः परीक्षितः

**12.** आत्मयोनिरिति कस्य संज्ञा?

(1) शिवस्य (2) प्रजापतेः (3) विष्णोः (4) इन्द्रस्य

**13.** तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम्।। इति कम्प्रति कस्य वचनम्?
(1) नारदस्य व्यासं प्रति (2) व्यासस्य युधिष्ठिरं प्रति
(3) भीष्मस्य युधिष्ठिरं प्रति (4) शुकस्य परीक्षितं प्रति

**14.** नृपलाञ्छनधरो वृषलः क आसीत्?
(1) दैत्यः (2) यमः (3) धूमकेतुः (4) कलिः

**15.** "द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलंगायत विष्णुगाथाः" इति कस्य वचनम्।
(1) युधिष्ठिरस्य (2) अभिमन्योः (3) परीक्षितः (4) जनमेजयस्य

**16.** योजनायुतमुच्छ्रितस्तावता च विस्तीर्णः क आसीत् पर्वतः?
(1) गन्धमादनः (2) हेमकूटः (3) त्रिकूटः (4) पारियात्रः

**17.** कः शान्तोऽपि घोरः मूढोऽपि ज्ञानधनः?
(1) विधाता (2) बालकः (3) तपस्वी (4) परमात्मा

**18.** करेणुभिरित्यस्य कोऽर्थः?
(1) कुत्सितरेणुभिः (2) कृष्णरेणुभिः (3) कुसुमितरेणुभिः (4) गजपत्नीभिः

**19.** 'छन्दोमय' इति कस्य विशेषणम्?
(1) वेदस्य (2) मनोः (3) गरुडस्य (4) जीवस्य

**20.** कमुद्दिश्य स्तोत्रविशेषं, कस्येयमुक्तिः–
ये मां स्तुवन्त्यनेनाङ्ग प्रतिबुध्य निशात्यये।
तेषां प्राणात्यये चाहं ददामि विमलां मतिम्।।
इति?
(1) श्रीशुककृतं स्तोत्रमुद्दिश्य, परीक्षितः (2) श्रीप्रह्लादकृतं स्तोत्रमुद्दिश्य नारदस्य
(3) गजेन्द्रकृतं स्तोत्रमुद्दिश्य भगवतः (4) व्यासकृतं स्तोत्रमुद्दिश्य पराशरस्य

**21.** भगवता विष्णुना अमृतं पिबत: कस्य शिर: क्षुरधारेण चक्रेण जहार?

(1) वृत्रस्य (2) वृषपर्वण: (3) राहो: (4) धुन्धुमारस्य

**22.** 'पिशङ्गवासा' इत्यस्य कोऽर्थ:?

(1) पीतं वासस्थानं यस्य (2) पीते वाससी यस्य

(3) श्लक्ष्णोगन्धो यस्य (4) प्रेम्णा वसतीतिय:

**23.** <u>सोऽहं तद्द्रष्टुमिच्छामि यत्ते योषिद्वपुर्धृतम्</u>।

इति भगवन्तं श्रीहरिं क उक्तवान्?

(1) ब्रह्मा (2) शिव: (3) नारद: (4) शेष:

**24.** ब्रह्मणो दिवसमाने कल्पे, कति भवन्ति मन्वन्तराणि?

(1) दश (2) द्वादश (3) त्रयोदश (4) चतुर्दश

**25.** '<u>समस्त संसार परिश्रमापहम्</u>'–किम्?

(1) ज्ञानधनार्जनम् (2) धनज्ञानार्जनम्

(3) मानधनार्जनम् (4) उत्तमश्लोकगुणानुवर्णनम्

**26.** श्रीमद्भागवतस्य नवमस्कन्धे कति सन्त्यध्याया:?

(1) पञ्चदश (2) षोडश (3) विंशति (4) चतुर्विंशति

**27.** कस्य कन्या 'सुकन्या' नामासीत्?

(1) तृणबिन्दो: (2) कृशाश्वास्य (3) शर्याति: (4) जनमेजस्य

**28.** नभगापत्यं क:?

(1) नभाग: (2) नाभाग: (3) सनाभाग: (4) भागेन्दु:

**29.** अहो अनन्तदासानां महत्त्वं दृष्टमध मे।

इति कस्योक्तिः?

(1) अम्बरीषस्य (2) दुर्वाससः (3) जयस्य (4) जयन्तस्य

**30.** काऽऽसीत् विन्ध्यावली?

(1) विन्ध्यवासिनी दुर्गा (2) विन्ध्यपर्वतश्रृङ्खला

(3) विन्ध्याटवी (4) राज्ञो बलेः पत्नी

**31.** समुद्रमन्थन-प्रसङ्गे देवदानवयोर्मध्ये किमर्थं मिथः कलहोऽभूत्?

(1) कामधेन्वर्थम् (2) कल्पवृक्षार्थम् (3) अमृतार्थम् (4) कौस्तुभमण्यर्थम्

**32.** केन राजर्षिणा भुवनपावनी गङ्गा भुवि समानीता?

(1) अंशुमता (2) दिलीपेन (3) भगीरथेन (4) ऋतुपर्णेन

**33.** रघुः श्रीमद्भागवतमनुसृत्य कस्य पुत्र आसीत्?

(1) मान्धातुः (2) खट्वाङ्गस्य (3) दीर्घबाहोः (4) पृथुश्रवसः

**34.** पादपूर्त्तिर्विधेया–

गुर्वर्थे त्यक्तराज्यं व्यचरदनुवनं

........................।

(1) मञ्जुलो रामचन्द्रः (2) पद्मपाणिः पुरस्तात्

(3) पद्मपूर्णः पुरारिः (4) पद्मपद्भ्यां प्रियायाः

**35.** त्रिःसप्तकृत्वो केन पृथ्वी निःक्षत्रिया कृता?

(1) जमदग्निना (2) जह्नुना (3) परशुरामेण (4) बलरामेण

**36.** हैहयानामधिपतिः क आसीत्?

(1) अर्जुनः (2) कुशनाभः (3) ऋचीकः (4) शमीकः

**37.** 'घृताची' इति कस्या अभिधानम्?

(1) इन्द्रपत्न्याः (2) गन्धर्वकन्यायाः (3) अप्सरसः (4) किम्पुरुषकन्यायाः

**38.** मेनकानाम्न्यप्सराः कस्य जननी?

(1) शकुन्तलायाः (2) धर्मकलायाः (3) प्रमिताक्षरायाः (4) गान्दिन्याः

**39.** द्रौपदीपुत्रः प्रतिविन्ध्यः कस्य पाण्डवस्यात्मजः?

(1) युधिष्ठिरस्य (2) भीमस्य (3) अर्जुनस्य (4) नकुलसहदेवयोः

**40.** निमिः कस्य राज्ञः पुत्र आसीत्?

(1) सुरथस्य (2) सुनक्षत्रस्य (3) इक्ष्वाकोः (4) प्रसेनजितः

**41.** मैनाकेन कस्य सत्कारः प्रस्तावितः?

(1) श्रीरामस्य (2) लक्ष्मणस्य (3) हनूमंतः (4) सुग्रीवस्य

**42.** कमुद्दिश्य इयमुक्तिः-

स सूर्याय महेन्द्राय पवनाय स्वयम्भुवे।
भूतेभ्यश्चाञ्जलिं कृत्वा चकार गमने मतिम्॥

(1) पवनमुद्दिश्य (2) देवराजमुद्दिश्य (3) हनूमन्तमुद्दिश्य (4) सुग्रीवमुद्दिश्य

**43.** प्रविष्टोऽस्मि हि ते वक्त्रं दाक्षायाणि नमोऽस्तुते। – इत्यत्र 'दाक्षायणि' इतिपदस्य कोऽभिप्रायः?

(1) कुशलतपस्विनी (2) दक्षिण दिशा (3) दक्षिणासम्बन्धिनी (4) सुरसा

**44.** रावणस्य विमानं किमासीत्?

(1) पुष्पकम्   (2) पुष्परथः   (3) चित्रचक्रम्   (4) मयूरवर्णकम्

**45.** रावणेन सीतायाः कृते कियन्मासात्मकोऽवधिः प्रदत्तः?

(1) मासद्वयात्मकः   (2) मासत्रयात्मकः   (3) मासचतुष्टयात्मकः   (4) मासात्मकः

**46.** आत्मानं खादतानार्या न सीतां भक्षयिष्यथ। इति कयोक्तम्?

(1) त्रिजटया   (2) प्रघसया   (3) शूर्पणखया   (4) निकुम्भिलया

**47.** हनुमता सीतां श्रावयितुं का कथा वर्णिता?

(1) अध्यात्मकथा   (2) योगकथा   (3) रामकथा   (4) आत्मकथा

**48.** प्रत्यभिज्ञानार्थं हनुमता किमर्पितं सीतायै?

(1) चूडामणिः   (2) रामस्य मुद्रिका   (3) पत्रिका   (4) धनुर्यष्टिः

**49.** सीतायाः प्रत्यभिज्ञानार्थं हनुमता किं कथानकं श्रावितं रामपक्षतः?

(1) चित्रकूटेघटितकाककथानकम्   (2) श्रमणकुमार वृत्तम्

(3) काकोलूकीयम्   (4) दमनकवृत्तम्

**50.** मधुवनं नाम कस्याभिरक्षितमुपवनम्?

(1) रावणस्य   (2) विभीषणस्य   (3) सुग्रीवस्य   (4) जाम्बवतः

**51.** पादपूर्त्तिर्विधेया–

<u>पिबत भागवतं रसमालयं</u>

............................।

(1) मुहुरहो करुणावरुणालया:  (2) मुहुरहो शुचि रागसमञ्चिता:

(3) मुहुरहो रसिका भुवि भावुका:  (4) मुहुरहो हरिकीर्त्तनरागिण:

**52.** पादपूर्त्तिर्विधेया–

........................

<u>द्वैपायनो विरहकातर आजुहाव</u>।

(1) यं जन्ममृत्युपरिवर्जितदिव्यरुपम्  (2) यं तत्त्ववेदनपरं विबुधं वरेण्यम्

(3) यं श्रीशुकं करुणयार्द्रमन:शरीरम्  (4) यं प्रव्रजन्तमनुपेतमपेतकृत्यम्

**53.** मुमुक्षव: कान् हित्वा शान्ता नारायणकला भजन्ति?

(1) घोररुपान् भूतपतीन्  (2) समग्रं प्रपञ्चम्

(3) कर्मकलापान्  (4) विचारान्

**54.** सदसद्रूपा का?

(1) भावना  (2) वृत्ति:  (3) छाया  (4) माया

**55.** पादपूर्त्तिर्विधेया–

<u>वासुदेवपरावेदा वासुदेव परामरवा:</u>

<u>वासुदेवपरा योगा</u>....................॥

(1) वासुदेवपरा गुणा:  (2) वासुदेव परा: क्रिया:

(3) वासुदेवाश्रिता सृति:  (4) वासुदेवधिया जना:

**56.** पादपूर्त्तिर्विधेया–

एते चांशकला: पुंस: कृष्णस्तु भगवान् स्वयम्।

इन्द्रारिव्याकुलं लोके..................।।

(1) मृडयन्ति युगे युगे (2) क्रीडति प्रीतिसंयुत:

(3) पश्यन्नपि न पश्यति (4) करोति सुखसंयुतम्

**57.** देव्यो कं दृष्ट्वा ह्रिया परिदधु:?

(1) नारायणम् (2) व्यासम् (3) शुकम् (4) नारदम्

**58.** पञ्चमवेद: किमुच्यते?

(1) काव्यशास्त्रम् (2) धर्मशास्त्रम् (3) इतिहास पुराणम् (4) आगमशास्त्रम्

**59.** उरुक्रम: क:?

(1) ब्रह्मा (2) श्रीहरि: (3) शिव: (4) इन्द्र:

**60.** पादपूर्त्तिर्विधेया–

प्रद्युम्नायानिरुद्धाय..............।।

(1) नमो देववराय च (2) नमो कल्याणमूर्त्तये

(3) नमस्ते ते विदांवर (4) नम: सङ्कर्षणाय च

**61.** क: शैलश्चित्रकानन:?

(1) चित्रकूट: (2) मयन्द: (3) प्रस्त्रवण: (4) कैलास:

**62.** आत्मारामा निर्ग्रन्था अपि मुनय: कस्मिन् अहैतुकीं भक्तिं कुर्वन्ति?

(1) इन्द्रे (2) शिवे (3) उरुक्रमे (3) उरुक्रमे

**63.** सात्वतपुङ्गवे इति कमुद्दिश्य कथितम्?

(1) ब्रह्माणमुद्दिश्य (2) शिवमुद्दिश्य

(3) श्रीकृष्णमुद्दिश्य (4) युधिष्ठिरमुद्दिश्य

**64.** गजाह्वयम् इति कस्य नगरस्य अपरमभिधानम्?

(1) इन्द्रप्रस्थस्य (2) भोजकटस्य (3) हस्तिनापुरस्य (4) कुण्डिनपुरस्य

**65.** यथाब्जखण्डे कलहंस उत्स्वनः— इत्येषा उपमा कस्य कृते प्रयुक्ता भागवतकारेण?

(1) भगवत्करस्थितस्य शङ्खस्य कृते (2) भगवच्चरणस्थितस्य धवलाम्बरस्य

(3) अरुणोदयोपरिविराजमानस्य सूर्यवर्चसः (4) भगवदधर संयुक्तस्य दध्योदनस्य कृते

**66.** नीहारमिव गोपतिः इत्यत्र गोपति-शब्दस्य कोऽर्थः?

(1) गोपः (2) वृषभः (3) जीवः (4) सूर्य्यः

**67.** निग्रहीता कलेरेष इति कस्य विषयिणीयमुक्तिः भागवते?

(1) शुकविषयिणी (2) परीक्षिद्विषयिणी (3) युधिष्ठिरविषयिणी (4) अर्जुनविषयिणी

**68.** गीतं भगवता ज्ञानं यत्तत्सङ्ग्राममूर्धनि इति वचनेन को ग्रन्थः परामृश्यते?

(1) सनत्सुजातीयम् (2) विदुरनीतिः (3) भीष्मस्तवः (4) श्रीमद्भगवद्गीता

**69.** कल्पस्यादिमन्वन्तरस्य मनुः कः?

(1) वैवस्वतः (2) स्वारोचिषः (3) स्वायम्भुवः (4) चाक्षुषः

**70.** कः शतरूपापतिः?

(1) स्वायम्भुवमनुः (2) दिव्यमनुः (3) चिन्मनुः (4) निर्मनुः

**71.** कस्य गन्धमात्रमाघ्राय व्याघ्रादयः पशवो भयाद् द्रवन्ति स्म?

(1) गन्धमादनस्य (2) गन्धर्वराजस्य (3) गजेन्द्रस्य (4) दैत्यस्य

**72.** पूर्वस्मिञ्जन्मनि गजेन्द्रः क आसीत्?

(1) गृत्समदो नाम ऋषिः (2) इन्द्रद्युम्नो नाम राजा

(3) चित्ररथो नाम गन्धर्वः (4) सीरपाणिर्नाम यक्षः

**73.** <u>प्रध्माय जलजोत्तमम् इत्यत्र</u> 'जलज'-शब्दस्य कोऽर्थः?

(1) कमलम् (2) शङ्खः (3) शैवालः (4) मत्स्यः

**74.** 'वैरोचनिः' कः?

(1) बलिः (2) प्रह्लादः (3) इन्द्रः (4) ज्येष्ठः

**75.** कस्य कुक्षिः समुद्रा गिरयश्च अस्थिसङ्घाः?

(1) विराड्रुपस्य महादेवस्य (2) दिव्यदेवस्य

(3) ब्रह्मणः प्रजापतेः (4) कालस्य

**76.** पाकशासनः' इति कस्य अभिधानम्?

(1) वरुणस्य (2) यज्ञस्य (3) इन्द्रस्य (4) कुबेरस्य

**77.** श्रीमद्भागवतस्य अष्टमस्कन्धे कस्मिन्नध्याये पयोव्रतस्य विधिर्वर्णितः?

(1) षोडशे (2) सप्तदशे (3) विंशे (4) द्वाविंशे

**78.** श्रवणद्वादश्याम् अभिजिन्मुहूर्ते कोऽवततार भगवान्?

(1) कपिलः (2) वामनः (3) परशुरामः (4) यज्ञः

**79.** त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा। इति कमुद्दिश्य कस्योक्तिः?

(1) वामनमुद्दिश्य बलेः (2) बलिमुद्दिश्य वामनस्य

(3) बलिमुद्दिश्य शुक्राचार्यस्य (4) बलिमुद्दिश्य प्रह्लादस्य

**80.** गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः। कः?

(1) प्रह्लादः (2) प्राह्लादिः (3) बलिः (4) बाणः

**81.** 'इन्द्रसेन' इति कस्यापरं नाम?

(1) पुरन्दरस्य (2) बलेः (3) विरोचनस्य (4) शुक्राचार्यस्य

**82.** कृतमालायां जलतर्पणं कुर्वतो कस्य अञ्जल्युदके शफरी समापतत्?

(1) द्युमत्सेनस्य (2) सत्यव्रतस्य (3) द्रढव्रतस्य (4) महासेनस्य

**83.** भगवता मत्स्येन किन्नामधेया पुराणसंहिता सत्यव्रताय श्राविता?

(1) मत्स्यपुराण नामधेया (2) मत्स्यसंहिताख्या

(3) मत्स्योपपत्तिः (4) मत्स्यतन्त्र संहिताख्या

**84.** श्राद्धदेवः कः?

(1) देवः (2) उपदेवः (3) मनुः (4) गन्धर्वः

**85.** श्रद्धाख्यां पत्न्यां वैवस्वतमनुः कति पुत्रान् जनयामास?

(1) पञ्च (2) सप्त (3) नव (4) दश

**86.** 'इला' काऽऽसीत्?

(1) गन्धर्वी (2) वैवस्वतमनोर्दुहिता (3) कामधेनुः (4) ऋषिपत्नी

**87.** पुरुषरुपिण्या इलाया: किन्नाम प्राचलत्?

(1) द्युमत्सेन: (2) प्रद्युम्न: (3) सुद्युम्न: (4) द्युतिमान्

**88.** 'पृषध्र:' क:?

(1) स्वायम्भुवस्य मनो: पुत्र: (2) चाक्षुषस्य मनो: पुत्र:

(3) वैवस्वतस्य मनो: पुत्र: (4) यक्ष:

**89.** कस्य यज्ञस्य सर्वे सम्भारा हिरण्मया आसन्?

(1) उत्तमस्य (2) मरुत्तस्य (3) प्राचीन बर्हिष: (4) नाभागस्य

**90.** 'अलम्बुषा' इति कस्या नाम?

(1) नगर्य्या (2) गन्धर्व्या: (3) अप्सरस: (4) किम्पुरुषकन्याया:

**91.** तात जामाता तवैष भृगुनन्दन: इति कस्या उक्ति:

(1) सुचित्राया: (2) सुमित्राया: (3) सुकन्याया: (4) सुधन्याया:

**92.** श्रीहरि: कस्मै स्वभक्तवराय प्रत्यनीक-भयावहं स्वसुदर्शनचक्रमददात्?

(1) नभगाय (2) नाभागाय (3) अम्बरीषाय (4) पृषदश्वाय

**93.** तमेव शरणंयाहि हरिस्तेशंविधास्यति इति दुर्वासा: केनोपदिष्ट:?

(1) ब्रह्मणा (2) शिवेन (3) नारदेन (4) तुम्बुरुणा

**94.** अहो अनन्तदासानां महत्त्वं दृष्टमद्य मे इति कस्य वचनम्?

(1) दुर्वासस: (2) अम्बरीषस्य (3) सुदर्शनस्य (4) राजसचिवस्य

**95.** सप्तद्वीपपतिर्मान्धाता कस्य गार्हस्थ्यं वीक्ष्य विस्मितः स्तम्भमजहात्?

(1) इन्द्रस्य (2) दिव्यक्रोडस्य

(3) सौभरिनाम कस्य ऋषेः (3) कल्याणजीवनस्य गन्धर्वस्य

**96.** त्रिशङ्कुनाम्नो राज्ञः क आसीत् पुत्रः?

(1) हारीतः (2) पुरुकुत्सः (3) हरिश्चन्द्रः (4) रोहितः

**97.** अंशुमतः पितुर्नाम किम्?

(1) समञ्जसः (2) असमञ्जसः (3) यौवनाश्वः (4) हरितः

**98.** कोऽपि धारयिता वेगं पतन्त्या मे महीतले।

अन्यथा भूतलं भित्वा नृप यास्ये रसातलम्।। इति कथोक्तं कं प्रति।

(1) दुर्गया, भक्तं प्रति (2) गङ्गया, भगीरथं प्रति

(3) सरस्वत्या, हंसं प्रति (4) रमया गरुडं प्रति

**99.** पुष्पकस्यः को रेजे?

(1) भगवान् रामः (2) परशुरामः (3) कुबेरः (4) विभीषणः

**100.** प्राचेतसाश्रमः कः?

(1) महर्षिवाल्मीकेराश्रमः (2) भगवतो व्यासस्याश्रमः

(3) असितस्याश्रमः (4) भरद्वाजस्याश्रमः

**101.** श्रीरामस्य पुत्रयोर्नाम किमासीत् ?

(1) कुशलवौ (2) सुबाहुश्रुतसेनौ (3) तक्षपुष्कलौ (4) चित्रकेत्वङ्गदौ

**102.** इक्ष्वाकूणां वंशो भागवते कियत्पर्यन्त उक्त:?

(1) अग्निमित्रान्त: (2) सुमित्रान्त: (3) देवान्त: (4) मित्रसहान्त:

**103.** के राजान आत्मविद्याविशारदा बभूवु:?

(1) ऐक्ष्वाकव: (2) यदुवंशसम्भवा: (3) मैथिला: (4) मागधा:

**104.** अहं वन्ध्याऽसपत्नी च स्नुषा मे युज्यते कथम्।

इति ज्यामघं प्रति का उक्तवती?

(1) शैब्या (2) प्रमीला (3) सुकर्णा (4) व्योमवती

**105.** कस्य वंशं नर:श्रुत्वा सर्वपापै: प्रमुच्यते?

(1) यदो: (2) द्रुह्यो: (3) तुर्वसो: (4) पूरो:

**106.** शशबिन्दु: कीदृश आसीत्?

(1) गान्धर्वविद् (2) तत्त्वज्ञ: (3) महायोगी (4) रागी

**107.** मनुष्याणां क: श्रेष्ठ:?

(1) बभ्रु: (2) वृष्णि: (3) युयुधान: (4) सुमित्र:

**108.** श्वफल्कस्य पत्न्या: किं नाम?

(1) सन्धिनी (2) गान्दिनी (3) श्रुतदेवा (4) प्रमीला

**109.** कस्य राज्ञ: सखा तुम्बुरु-नामा गन्धर्व आसीत्?

(1) अनो: (2) अन्धकस्य (3) मृदुरस्य (4) कम्बलबर्हिष:

**110.** 'मारिषा' कस्यासीत् पत्नी?

(1) देवमीढस्य शूरस्य (2) प्रबुद्धस्य वीरस्य (3) चक्रचीवरस्य (4) अहिर्बुध्न्यस्य

**111.** वसुदेवो देवक्यां कति पुत्रानजीजनत्?

(1) पञ्च (2) सप्त (3) अष्टौ (4) दश

**112.** शाद्वलेषु को विचचार?

(1) जाम्बवान् (2) हनुमान् (3) अङ्गदः (4) सुग्रीवः

**113.** हनुमता पीड्यमानः कः पर्वतः काञ्चनाञ्जनराजतीः रीतीर्निवर्त्तयामास?

(1) मेकलः (2) मैनाकः (3) महेन्द्रः (4) प्लवङ्गमः

**114.** "यदि जनकात्मजां लङ्कायां नहि द्रक्ष्यामि तर्हि अनेनैव वेगेन गमिष्यामि", क्व?

(1) सुरालयम् (2) रमणकद्वीपम् (3) नागालयम् (4) दण्डकारण्यम्

**115.** सुपर्णमिव चात्मानं मेने स कपिकुञ्जरः इत्यत्र सुपर्ण-शब्दस्य कोऽर्थः?

(1) जटायुः (2) सम्पाती (3) अरुणः (4) गरुडः

**116.** दुष्करं कृतवान् कर्म त्वमिदं वानरोत्तम इति केन प्रशंसितो हनुमान्?

(1) श्रीरामेण (2) सुग्रीवेण (3) मैनाकेन (4) सुरसया

**117.** काऽऽसीत् सुरसा?

(1) देवमाता (2) नागमाता (3) गन्धर्वमाता (4) दैत्यमाता

**118.** वरुणालयः इति कस्याभिधानम्?

(1) भगवतः श्रीहरेः (2) वरुणलोकस्य (3) समुद्रस्य (4) वैकुण्ठस्य

**119.** सुरसायाः शतयोजनमायतं मुखं वीक्ष्य किमकरोत् हनुमान्?

(1) सार्द्धशतयोजनोच्छ्रितो जातः (2) द्विशतयोजनोच्छ्रितो जातः

(3) सार्द्धद्विशतयोजनोच्छ्रितो जातः (4) अतिसंक्षिप्तो जातः

**120.** काऽऽसीत् अचिन्त्या अद्भुताकारा?

(1) सुरसा (2) छायाग्राहिणी (3) त्रिकूटा (4) लङ्का

**121.** हनुमान् कियद् योजनात्मकं सागरं तीर्णवान्?

(1) नवतियोजनात्मकं (2) शतयोजनात्मकम्

(3) सार्द्धशतयोजनात्मकम् (4) पञ्चसहस्त्रयोजनात्मकम्

**122.** प्लवङ्गमोत्तमो हनुमान् रावणगृहाभ्यन्तरे सीतामदृष्ट्वा कीदृशो जात:?

(1) दु:खोपहत: (2) चिन्ताऽऽकुल: (3) क्रोधोद्धत: (4) निराश:

**123.** हनुमान <u>कुबेरभवनं यथा</u> इति किं ददर्श?

(1) कुम्भकर्णनिवेशनम् (2) रावणगृहम् (3) विभीषणगृहम् (4) सुग्रीवभवनम्

**124.** <u>वसन्तपुष्पोत्करचारुदर्शनं</u> किमासीत्?

(1) अशोकवनम् (2) रावणगृहम् (3) विभीषणगृहम् (4) पुष्पकविमानम्

**125.** रावण: कस्य पुत्र आसीत्?

(1) पुलस्त्यस्य (2) क्रतुभुज: (3) विश्रवस: (4) विभाण्डकस्य

**126.** <u>क्षीबोविचित्राभरण:</u> इत्यत्र 'क्षीब'-शब्दस्य कोऽर्थ:?

(1) स्थूल: (2) मदाकुल: (3) सुन्दर: (4) कुशल:

**127.** रावण: शुना शार्दूलयोरिव कयो: सन्दर्शने स्थातुं न शक्नोति?

(1) हनुमत्सुग्रीवयो: (2) नलनीलयो: (3) रामलक्ष्मणयो: (4) इन्द्रोपेन्द्रयो:

**128.** श्रीरामो द्विरदवत् तदा रावण: कीदृश: प्रोक्त: सीतया?

(1) सर्पवत् (2) शशवत् (3) श्ववत् (4) मर्कटवत्

**129.** अकामां कामयानस्य शरीरमुपतप्यते इति का राक्षसी उक्तवती रावणं प्रति?

(1) धान्यमालिनी (2) हरिजटा (3) दुर्मुखी (4) विकटा

**130.** कस्य भयात् तरवः पुष्पवृष्टिं मुमुचुः?

(1) रावणस्य भयात् (2) निकुम्भस्य भयात् (3) महोदरस्य भयात् (4) धूम्राक्षस्य भयात्

**131.** धिगस्तु खलु मानुष्यं धिगस्तु परवश्यताम् : इति कस्योक्तिः?

(1) सीतायाः (2) रामस्य (3) सुग्रीवस्य (4) तारायाः

**132.** का 'प्रणिपात प्रसन्नेति' त्रिजटयोक्ता?

(1) दुर्गा (2) श्रीः (3) सीता (4) योगमाया

**133.** जानकी अशोकवनिकायां कस्य वृक्षस्य मूले पर्यवस्थिता?

(1) अशोकवृक्षस्य मूले
(2) शिंशपावृक्षस्य मूले
(3) वटवृक्षस्य मूले
(4) आम्रवृक्षस्य मूले

**134.** विश्रान्तः श्वो गमिष्यसि? इति कं प्रति कयोक्तम्?

(1) हनुमन्तं प्रति सीतया
(2) जाम्बवन्तं प्रति रुमया
(3) केसरिणं प्रत्यञ्जनया
(4) वालिनं प्रति तारया

**135.** बलैकदेशः क्षपितः इत्यत्र हनुमद्वाक्ये बल-शब्दस्य कोऽभिप्रायः?

(1) पराक्रमः (2) शक्तिः (3) सेना (4) प्रभावः

**136.** कपिवरेण हनुमता स्वलाङ्गूलाग्निं क्व निर्वापितः?

(1) रावणगृहस्य पल्वले
(2) अशोकवनपुष्करिण्याम्
(3) समुद्रे
(4) श्वेतकूपे

**137.** सर्वथा कृतकार्योऽसौ हनूमान् नात्रसंशय: इति केनोक्तम्?

(1) सुग्रीवेण (2) जाम्बवता (3) अङ्गदेन (4) नलेन

**138.** क: पर्वतो मातरिश्वन: सखा इत्युक्त: सुन्दरकाण्डे ?

(1) कैलास: (2) गोवर्द्धन: (3) मैनाक: (4) त्रिकूट:

**139.** के पुरा पक्षवन्तो बभूवु:?

(1) पर्वता: (2) मनुष्या: (3) किन्नरा: (4) गाव:

**140.** सुखीभव महाबाहो प्रीताऽस्मि तव वानर–इति कस्योक्ति:?

(1) सुरसाया: (2) सिंहिकाया: (3) नन्दिन्या: (4) छायाग्राहिण्या:

**141.** दधिमुख: क:?

(1) गन्धर्व: (2) यक्ष:

(3) किन्नर: (4) सुग्रीवस्य वनपालो वानर:

**142.** प्रहृष्टो न तु रुष्टोऽसौ वनं श्रुत्वा प्रधर्षितम्। कस्य विषये इयमुक्ति:?

(1) हनुमद्विषये (2) सुग्रीवविषये (3) अङ्गदविषये (4) दधिमुखविषये

**143.** न मे मधुवनं हन्याददृष्ट्वा जनकात्मजाम्। कस्येयमुक्ति:?

(1) राघवस्य (2) लक्ष्मणस्य (3) सुग्रीवस्य (4) हनुमत:

**144.** क आसीत् सीतावृत्तान्तकोविद:?

(1) राम: (2) लक्ष्मण: (3) हनुमान् (4) अङ्गद:

**145.** वानरेषु को युवराज: प्लवतां वरश्चासीत्?

(1) अङ्गद: (2) सुग्रीव: (3) नील: (4) द्विविद:

**146.** 'किलकिला' शब्दस्य कोऽभिप्राय:?

(1) मयूराणां गुञ्जार: (2) वानराणां हर्षोत्फुल्लमय: शब्द:

(3) वंशवृक्षाणां शब्द: (4) प्रस्रवण शब्द:

**147.** 'दृष्टा देवीति' हनुमन्मुखात् कीदृशं वचनं रामेण श्रुतम्?

(1) दुग्धोपमम् (2) अमृतोपमम् (3) जलोपमम् (4) फलोपमम्

**148.** वाक्यज्ञ: क आसीद्?

(1) श्रीराम: (2) लक्ष्मण: (3) हनुमान् (4) अङ्गद:

**149.** सीताया: स्तनान्तरं क: सहसोत्पत्य विददार?

(1) वायस: (2) पिपीलक: (3) मशक: (4) कीट:

**150.** सीतया रामप्रत्यभिज्ञानार्थं हनुमते किं दत्तम्?

(1) चूडामणि: (2) अङ्गुलीयकम् (3) वज्रमणि: (4) मुक्ताफलम्

# अभ्यर्थियों के लिए निर्देश

*(इस पुस्तिका के प्रथम आवरण पृष्ठ पर तथा उत्तर-पत्र के दोनों पृष्ठों पर केवल नीली-काली बाल-प्वाइंट पेन से ही लिखें)*

1. प्रश्न पुस्तिका मिलने के 10 मिनट के अन्दर ही देख लें कि प्रश्नपत्र में सभी पृष्ठ मौजूद हैं और कोई प्रश्न छूटा नहीं है। पुस्तिका दोषयुक्त पाये जाने पर इसकी सूचना तत्काल कक्ष-निरीक्षक को देकर सम्पूर्ण प्रश्नपत्र की दूसरी पुस्तिका प्राप्त कर लें।
2. परीक्षा भवन में ***लिफाफा रहित प्रवेश-पत्र के अतिरिक्त,*** लिखा या सादा कोई भी खुला कागज साथ में न लायें।
3. ***उत्तर-पत्र अलग से दिया गया है। इसे न तो मोड़ें और न ही विकृत करें। दूसरा उत्तर-पत्र नहीं दिया जायेगा। केवल उत्तर-पत्र का ही मूल्यांकन किया जायेगा।***
4. अपना अनुक्रमांक तथा उत्तर-पत्र का क्रमांक प्रथम आवरण-पृष्ठ पर पेन से निर्धारित स्थान पर लिखें।
5. ***उत्तर-पत्र के प्रथम पृष्ठ पर पेन से अपना अनुक्रमांक निर्धारित स्थान पर लिखें तथा नीचे दिये वृत्तों को गाढ़ा कर दें। जहाँ-जहाँ आवश्यक हो वहाँ प्रश्न-पुस्तिका का क्रमांक तथा सेट का नम्बर उचित स्थानों पर लिखें।***
6. ***ओ० एम० आर० पत्र पर अनुक्रमांक संख्या, प्रश्नपुस्तिका संख्या व सेट संख्या (यदि कोई हो) तथा प्रश्नपुस्तिका पर अनुक्रमांक और ओ० एम० आर० पत्र संख्या की प्रविष्टियों में उपरिलेखन की अनुमति नहीं है।***
7. ***उपर्युक्त प्रविष्टियों में कोई भी परिवर्तन कक्ष निरीक्षक द्वारा प्रमाणित होना चाहिये अन्यथा यह एक अनुचित साधन का प्रयोग माना जायेगा।***
8. ***प्रश्न-पुस्तिका में प्रत्येक प्रश्न के चार वैकल्पिक उत्तर दिये गये हैं। प्रत्येक प्रश्न के वैकल्पिक उत्तर के लिए आपको उत्तर-पत्र की सम्बन्धित पंक्ति के सामने दिये गये वृत्त को उत्तर-पत्र के प्रथम पृष्ठ पर दिये गये निर्देशों के अनुसार पेन से गाढ़ा करना है।***
9. प्रत्येक प्रश्न के उत्तर के लिए केवल एक ही वृत्त को गाढ़ा करें। एक से अधिक वृत्तों को गाढ़ा करने पर अथवा एक वृत्त को अपूर्ण भरने पर वह उत्तर गलत माना जायेगा।
10. ***ध्यान दें कि एक बार स्याही द्वारा अंकित उत्तर बदला नहीं जा सकता है। यदि आप किसी प्रश्न का उत्तर नहीं देना चाहते हैं, तो संबंधित पंक्ति के सामने दिये गये सभी वृत्तों को खाली छोड़ दें। ऐसे प्रश्नों पर शून्य अंक दिये जायेंगे।***
11. रफ कार्य के लिए प्रश्न-पुस्तिका के मुखपृष्ठ के अंदर वाला पृष्ठ तथा उत्तर-पुस्तिका के अंतिम पृष्ठ का प्रयोग करें।
12. परीक्षा के उपरान्त केवल ***ओ एम आर उत्तर-पत्र*** परीक्षा भवन में जमा कर दें।
13. परीक्षा समाप्त होने से पहले परीक्षा भवन मे बाहर जाने की अनुमति नहीं होगी।
14. यदि कोई अभ्यर्थी परीक्षा में अनुचित साधनों का प्रयोग करता है, तो वह विश्वविद्यालय द्वारा निर्धारित दंड का/की, भागी होगा/होगी।

SEAL